(4) 1. तदा सा मातृमुखेन पितरं भ्रातरं च न्यवेदयत।
2. तदवच्च सोमप्रभा नाम लावण्यवती कन्यापि तस्य संभूता।
3. उज्जयिन्यो हरिस्वामीति सद्गुणो विप्रवरः पुण्यसेनस्य भूपतेः प्रधानामात्यो बभूव।
4. क्रमेण तु समुल्लसितयौवना सा विवाहयोग्याऽभवत्।
5. अहं तस्यैव कण्ठे मालामर्पष्यिामि यः शूरो वा ज्ञानी वा विज्ञानी वा भवति।

(5) 1. तत्तैषां मध्यात्कथय को भवानिति।
2. कुमारस्तं प्रत्यभाषत जानाम्यहं विज्ञानमिति।
3. तच्छ्रुत्वा तत्पिता हरिस्वामी तादृशं वरमितस्ततो अन्विष्यन् चिन्तां वहति।
4. तर्हि तद्दर्शयस्वेति तेनादिष्टः सः कुमारः स्वशक्त्या गगनचरं रथं कल्पयामास।
5. तावदेकः कुमारस्तमभ्येत्य तां सुतां ययाचे।
6. हरिस्वामी तं प्रपच्छ।
7. ज्ञानिनं, विज्ञानिनं, शूरं वा विहाय मत्पुत्री नान्यं वरमिच्छति।

(6) 1. तेन एकं घटं प्राप्तम्।
2. एकः पिपासितः काकः जलार्थं यत्र तत्र भ्रमति।
3. सः घटे पाषाणखण्डान् क्षिपति।
4. किन्तु घटे न्यूनं जलम् आसीत्।

5. तदनन्तरम् जलम् उपरि आगतम्।
6. सः युक्तिं चिन्तयति।
7. काकः सौख्येन जलं पीतवान्।

(7) 1. तत्र च मेघवर्णो नाम वायसराजः प्रतिवसति स्म।
2. तस्य समीपे अनेकशाखासनाथः अतिघनतरपत्रच्छन्नो न्यग्रोधपादपोऽस्ति।
3. अस्ति दक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम्।
4. सः तत्र कालं नयति स्म।

(8) 1. तं मृगं दृष्ट्वा श्रृगालोऽचिन्तयत् – आः, कथमेतन्मासं सुललितं भक्षयामि।
2. तस्यां स्नेहेन मृगकाकौ निवसतः।
3. अस्ति मगधदेशे चम्पकवती नाम अरण्यानी।
4. भवतु, तावद् विश्वासं उत्पादयामि।
5. एकदा एकः श्रृगालः तत्र आगतः।
6. श्रृगालेन स्वेच्छया भ्राम्यन् मृगः अवलोकितः।
7. स मृगमुपसृत्यावोचत् – मित्र, कुशलं ते ?

(9) 1. तेन भिक्षार्जितैः सक्तुभिः कलशः सम्पूरितः।
2. सः घटं नगदन्ते अवलम्बितवान्।
3. कश्मिमिश्चन्नगरे कश्चिद् स्वभावकृपणः विप्रः प्रतिवसति स्म।
4. विप्रः तस्याधस्तात् खट्वां निधाय सततम् एकदृष्टया तम् अवलोकयति।
5. तद्यदि दुर्भिक्षं भवति तदनेन रूप्यकाणां शतमुत्पत्स्यते।
6. यत् अयं घटः सक्तुभिः परिपूर्णः वर्तते।
7. अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास।

(10) 1. तस्य समीपे पलाशनगरमस्ति।
2. वयं तुभ्यम् आहारार्थं प्रतिदिनमेकं मानवं दास्यामः।
3. अस्ति उत्तरदेशे शैवालघोषो नाम पर्वतः।
4. भो बकासुर ! त्वं यथेच्छं सम्मुखपतितं यं कमेव मा भक्षय।
5. आगत्य सम्मुखायातं यं कञ्चन मानुषं स्त्रियं बालकं वा पर्वते नीत्वा भक्षयति।
6. तस्मिन् पर्वते कश्चिद् राक्षसः प्रतिवसति स्म।

प्र. 12 अधोलिखितानां कवीनां संक्षिप्त परिचयं लिखत।
(निम्नलिखित कवियों का संस्कृत में संक्षिप्त परिचय लिखिए)

1. भवभूतिः
2. भट्भनारायणः
3. विशाखदत्तः।
4. कालिदासः
5. शूद्रकः
6. बाणभट्टः
7. जगन्नाथः
8. दण्डी

9. कौटिल्यः

10. आचार्य मनुः **(अथवा)**

संक्षिप्त टिप्पणी लिखत – (संक्षिप्त टिप्पणी लिखिए)

11. नान्दी
12. नेपथ्य
13. प्रस्तावना
14. विष्कम्भक
15. स्वगतम्
16. प्रकाशम्
17. प्रवेशक
18. उपनिषद्
19. श्रमिद्भागवतमहापुराणम्
20. मनुस्मृतिः

प्र. 13. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठस्थीकृतं सुभाषितद्वयं लिखत।

(प्रश्न पत्र में आए श्लोकों को छोड़कर कोई दो सुभाषित श्लोक लिखिए)

प्र. 14. अधोलिखित प्रश्नानाम् उत्तराणि संस्कृतभाषायामेकवाक्येन देयानि।

1. इदं विश्वं कस्याम् आविवेश ?
2. पृथिवीं के धारयन्ति ?
3. स्वार्गदपि का गरीयसी ?
4. भारतभूमिः कयोः आस्पदहेतुभूता ?
5. कीदृशी लङ्का न रोचते ?
6. पाठे संवादः कयोः मध्ये प्रवर्तते ?
7. जायायै कामाय का प्रिया भवति ?
8. सर्वस्य कामाय किं प्रियं भवति ?
9. मैत्रेयी का आसीत् ?
10. कस्य दर्शनेन सर्वं विदितं भवति ?
11. वेतालः राजानं किमब्रवीत् ?
12. हरिस्वामी कुमारं किमुक्तवान् ?
13. सोमप्रभायाः भगिनी कुमारं किम् उक्तवती ?
14. सोमप्रभा कीदृशं पतिमिच्छति स्म?
15. विवाहदिने सोमप्रभा कुत्र गता ?
16. लोभक्रोधमोहमानाः किं कुर्वन्ति ?
17. कस्मात् चिन्तोद्येगादयः प्रवृत्ताः ?
18. अभिशापप्रभवस्य किं कारणम् ?
19. अभिशापप्रभवस्य किं कारणम् ?
20. विचारदोषे केषां पुनर्जन्म भवति ?

21. कः जितेन्द्रियः भवति ?
22. विद्या कुत्र न वक्तव्या ?
23. गुरूः शिष्यं किं शिक्षयेत् ?
24. चत्वारि कस्य वर्धन्ते ?
25. कुत्र यत्नमातिष्ठेत् ?
26. बोधिसत्वः कथं राज्यं करोति स्म ?
27. कोसलराजस्य किं नाम आसीत् ?
28. मल्लिको दृढं कस्य क्षिपति ?
29. मल्लिकः साधुं कथं जयति ?
30. ब्रह्मदत्तः असाधुं कथं जयति ?
31. बोधिसत्वः किं अचिन्तयत् ?
32. मल्लिकाराजस्य सारथिः वाराणसीराजस्य सारथिं किमाह ?
33. वाराणसीराजस्य सारथिः किं अचिन्तयत् ?
34. कोसलराजस्य वाराणसीराजेन सह कैः गुणैः साम्यम् आसीत् ?
35. कोसलारास्य सारथिः स्वराजस्य शीलाचारं प्रकाशयन् कां गाथां अपठत् ?
36. स्वधर्मस्या तिक्रमे किं भवति ?
37. सर्वेषां धर्मः कः ?
38. स्वधर्मस्य प्रयोजनं किम् ?
39. त्रय्यां केषां समावेशः ?
40. वेदाङ्गानां नामानि लिखत।
41. रोहसेनः चाण्डालं प्रति किं कथयति ?
42. शकारः किमुक्त्वा त्वरयति ?
43. चारूदत्तः विदूषकं प्रति किं वदति ?
44. भिक्षुः वसन्तसेनां कुत्र नयति ?
45. चारूदत्तः मारयितुं किमर्थं नीयते ?
46. रघुः कपिशां केन साधनेन अतरत् ?
47. रघोः प्रतापं के विषेहिरे ?
48. उदन्वान् रामाय किं ददौ ?
49. रघुः कासां मधुमदं न सेहे ?
50. रघुः केषां शिरोभिः महीं तस्तार ?
51. दुर्याधनः कुत्र निमग्नः ?
52. भीमस्य गदायुद्ध केन सह अभवत् ?
53. मुनिवेषधारी कं वञ्चयितुमागतः ?
54. केन प्रतिज्ञा पूरिता ?
55. समराङ्गणात् कः पलायितः ?
56. चार्वकेण कः वार्ताप्रसङ्ग श्रावितः ?
57. दुर्याधनः कथं प्रतिज्ञां पूरितवान् ?
58. दुर्याधनः समराङ्गणात् पलाय्य किं कृतवान् ?
59. द्रौपदीयुधिष्ठिरौ वृतान्तं श्रुत्वा किं कृतवन्तौ ?

60. चन्दनदासः चाणक्यं किं विज्ञापितवान् ?
61. चन्दनदासस्य सुहद् कः आसीत् ?
62. अमात्यराक्षसस्य गृहजनः कुत्र आसीत् ?
63. चाणक्यः चन्दनदासं दण्डयितुं कस्य समीपं प्रेषयति ?
64. राजऽऽज्ञया कः शूलमारोपयितुं नीयते ?
65. चाणक्यः चन्दनदासस्य विषये मनसि किं विचारयति ?
66. दाण्डाज्ञां श्रुत्वा चन्दनदासः किं कथयति ?
67. चन्दनदासः कर्णौ पिधाय किं कथयति ?
68. लक्ष्मीः क्षीरसागरात् कान् विशेषान् गृहीत्वा उद्गता ?
69. लक्ष्म्याः अनार्यत्वसिद्धये वर्णितेषु कारणेषु एकं कारणं लिखत ?
70. लक्ष्मीः कथं न निर्भरपदमनुबध्नाति ?
71. लक्ष्मीः कथं निजचरितं प्रकटयति ?
72. लक्ष्मीः शूरं किमिव परिहरति ?
73. अन्धस्य कुत्र अधिकारः न भवति ?
74. सूरयः किं कृतवन्तः ?
75. सरस्वत्या किं आख्यातुं न शक्यते ?
76. कानि काव्यसम्पदः कारणानि ?
77. कीदृशी वाक् अनुग्रहृ करोति ?
78. आत्मा स्वप्ने किं पश्यति ?
79. मनः किं किं सृजति ?
80. दीपस्य दीपत्वं कथं भवति ?
81. आत्मा आत्मना कथम् आमृश्यते ?
82. आत्मनः पृथक् किं किं न दर्शनीयम् ?
83. कः कम् कुत्र उपदिशति ?
84. प्रतीहारी किं विज्ञापितवती ?
85. परिव्राजेन किं दत्तम् ?
86. नृपः कीदृशः आसीत् ?
87. नृपः कदा आहारं करोति स्म ?
88. कः जनपदर्विशेषः ब्रह्मलोकस्य प्रथमोऽवतार इवास्ति ?
89. कीदृशः चण्डालपः दुःसहः?
90. मेघः तापं कमं हरति ?
91. पद्मायाः निवासः कुत्र कुत्र अस्ति ?
92. कृष्णसारः कुत्र खेलति ?
93. प्रथमश्लोकः कं सम्बोध्य उक्तः ?
94. राजा मुख्यामात्यं किं प्राह ?
95. अमात्यः कुविन्दं किं प्राह ?
96. कुपितः कुविन्दः राजानं किम्प्राह ?
97. प्रच्छन्नवेशः राजा रात्रौ चरन् स्वपुरे कुत्रातिष्ठत् ?
98. मूर्खस्यापि जिव्हा कदा जडीभवति ?

99. सद्भ्यः किं न रोचते ?
100. चक्रवत् कानि परिवर्तन्ते ?
101. किं श्रुत्वा अवधार्यताम् ?
102. किं वृन्दमवसीदति ?
103. किम् अहं कामये ?
104. कस्य कीर्तिं श्रुत्वा भूषणकविः समायान् ?
105. शिववीरः मन्दिरम् प्रविश्य किं कृतवान् ?

प्र. 15 अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीया –
(निम्नलिखित अशुद्ध कारकवाक्यों को शुद्ध करिए)

1. त्वं कुत्र गच्छति ?
2. मह्यम फलं रोचित।
3. अहं फलं खादति।
4. बालकः सर्पेण विभेति।
5 माम् दुग्धं रोचते।
6 श्री गणेशं नमः।
7 द्वे बालकौ उद्याने क्रीडतः।
8 बालकाः विद्यालये गच्छन्ति।
9 चत्वारः फलानि वृक्षे सन्ति।
10 रामः सुरेशः च गच्छति।
11 नृपः भिक्षुकं धनं ददाति।
12 गुरूं नमः।
13 अग्निं स्वाहा।
14 तस्य नाम राधा अस्ति।
15 मम नामः राकेशः अस्ति।
16 वृक्षात् उपर्युपरि फलानि सन्ति।
17 एकः बालकः भवनेन पतति।
18 द्वे पुष्पे पतन्ति।
19 अहम् तत्र न आसीत्।
20 बालकाः गृहं गमिष्यथ।
21 त्रयः बालिकाः नृत्यं कुर्वन्ति।
22 बालकं मोदकं रोचते।
23 छात्राः मिष्ठान्नं भक्षन्ति।
24 जननी भोजनं पचिष्यति।
25 अहम् पश्यिष्यामि।
26 बालकाः पुस्तकाः पठन्ति।
27 चतस्रः बालकाः भ्रमन्ति।
28 तस्याः नाम सुरेशः अस्ति।
29 सः कः कार्यं करोति् ?

30 त्वं नाम किम् ?
31 विशाला प्रातः कालं पठति।
32 सरस्वतीं नमः।
33 तौ वदामः।
34 अहं भोजनं कृतम्।
35 सः महाविद्यालयं पठति।
36 शिवं नमः।
37 मार्जारः कोटरं बहिः पलायितः।
38 सः विद्वानः अस्ति।
39 छात्रेभ्यः कृष्णः पटुः।
40 अलं कोलाहलम्।
41 बालकं मिष्ठान्तं रोचते।
42 विद्यालय पारितः पुष्पाणि न सन्ति।
43 सज्जनाः सज्जनान् सह पलन्ति।
44 सः अध्ययन समये कक्षायाम् बहिः गच्छति।
45 माता पुत्रम् स्निह्यति।
46 इन्द्रं स्वाहा।
47 रूदतः बालकं माता अगच्छत्।
48 लम् उभयतः माता तिष्ठति।
49 सः पुष्पस्य अनुरक्तः अस्ति।
50 सः नृत्ये कुशला अस्ति।
51 परिश्रमम् मा प्रमद।
52 गंगा हिमालयस्य प्रभवति।
53 अध्यापकः छात्रम् कुप्यति।
54 अलं वदनात्।
55 कस्मै प्रयोजननेन तत्र गमिष्यसि।
56 बालिकायाः सह गच्छति।
57 परिश्रमात् बिना सफलता न मिलति।
58 देशस्य उभयतः जलम् वहति।
59 रामे वनं गते दशरथः मृतः।
60 शिक्षकं नमः
61 अध्यापकं: छात्रं पुस्तकं ददाति।
62 शिक्षिका छात्रं कुप्यति।
63 छात्राः मित्रस्य सह भ्रमणाय गच्छति।
64 नृपः ब्राह्मणम् धनं ददाति।
65 पुस्तकस्य बिना कथं पठति ?
66 चौरः रक्षकस्य विभेति।
67 जलस्य बिना जीवनं वृथा अस्ति।

68 खलेषु राजा त्रायते।

69 सः नेत्रात् काणः अस्ति।

70 भिक्षुकः नेत्रयोः अन्धः अस्ति।

71 मम मित्रः पादं खञ्जः।

72 सः कर्णेः बधिरः।

73 माता पुत्राय साकं गच्छति।

74 अहं ग्रामस्य प्रति गच्छामि।

75 रामः रावणः हतः

76 सीता आपणं मम्यते।

77 भवान नाम किं ?

78 अहं नाम राधा।

79 वयं नृत्यं पश्यन्ति।

प्र. 16 अधोलिखित गंद्याशानां सम्यक पठित्वा प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत –

(नि.लि. गंद्याशों को पढ़कर प्रश्नों के उत्तर संस्कृत भाषा में लिखिए)

1. स्वामी विवेकानन्दः अमेरिका देशे–भारतीय–संस्कृत्याः प्रचारं करोति स्म। तत्र कश्चन श्रोता तस्योपरि उपहासपूर्वकम् उक्तवान् – ''अहो! भारतीय संस्कृतयाः विसंगतिः। लक्ष्म्याः वाहनम् उलूकः अस्ति सरस्वत्याश्च वाहनं हंस इति।'' विवेकानन्दः तम् अवदत – ''एष एव अस्माकं भवतां च मध्ये चिन्तनभेदः दृष्टि भेदश्च। अस्याम् आशयो यत् धनाधीन–जनः सर्वदा उलूकवत् आचरति, विवेकम् आश्रितः नरः एव विद्वान् भवति। अतएव सरस्वत्याः वाहनं हसं लक्ष्म्याश्च वाहनम् उलूक इति।''

   1. विवेकानन्दः अमेरिकादेशे कस्याः प्रचारं करोति स्म ?
   2. कम् आश्रितः नरः विद्वान् भवति ?
   3. सरस्वत्या वाहनं किम् ?
   4. उलूकवत् कः आचरति ?
   5. गद्यांशस्य शीर्षकं लिखत।

2. कश्मिश्चिद् प्रदेशे काचित नदी प्रवहति स्म। नदीतीरे कश्चन सन्यासी स्वशिष्यैः सह आश्रमं निर्माय वसति स्म। एकदा सन्यासी शिष्यैः सह नद्याः अपरं तीरं गन्तुम् एकां नौकां आरूढ़वान्। वेगेन प्रवहन्त्यां नद्याम् अकस्मात् एका अपरा नौका शिलायाः घट्टेन निमग्ना अभवत्। तेन तस्यां नौकायां स्थिताः सर्वजनाः भरणं प्राप्तवन्तः। सन्यासी अकथत् तस्यां नौकायां स्थितेषु कश्चित् दुष्टः आसीत् इति मन्ये। अतः ते सर्वे मरणं प्राप्तवन्तः।

   1. सन्यासी कुत्र वसति स्म।
   2. नौकादुर्घटनायाम् सर्वे जनाः किम् प्राप्तवन्तः ?
   3. सन्यासी केन सह प्रतिवसति स्म ?
   4. अपरा नौका कथं नद्यां निमग्ना अभवत्।
   5. गंद्याशस्य शीर्षकं लिखत।

3 महाभारते व्यासः धर्मम् शाश्वतम् अकथयत् अतः नरेण लोभवशात् भयवशात् च धर्मस्य कदापि न करणीयः। महाभारतं वस्तुतः कौरव–पाण्डवयोः युद्धस्य वर्णनमेव चित्रयति।

प्रत्येकं वीरस्य वीरगाथां कथारूपेण वर्णयति। योगिराजः कृष्णस्य सारथित्वे अर्जुनेः एकाकी एवं अनेकान् जयति। युद्धे पात्रयोः संवादः यदा–कदा उपाख्यानं भवति। महाभारतस्य एकं अंशः गीतानाम्ना विश्वेप्रसिद्धः। अस्या अनुवादः विश्वस्य सर्वासु भाषासु विद्धद्भिः कृतः इत्यपि श्रूयते।

1. धर्मः कीदृशः कथ्यते ?
2. ''गीता'' कस्य अंशः अस्ति ?
3. कः एकाकी एव अनेकान् जयति ?
4. महाभारतम् किम् चित्रयति ?
5. ''कृतः'' इतिपदे कः प्रत्ययः ?
6. ''सर्वासु'' इति पदं कस्य विशेषणम् ?

4. एकदा निषादराजसुतः एकलव्यः आचार्य द्रोणामुपगम्य सविनयं प्रोवाच–'भगवन्, भवतः सकाशात् अहम् अस्त्रविद्यां प्राप्तुं समागातोऽस्मि।' द्रोणाचर्यः उत्तरं प्रददौ–'त्वं निषादोऽसि। अतः अस्त्र–विद्यामधिगन्तुमयोग्यः।' निराशः एकलव्यः तद्दिनाद् द्रोणाचार्यस्य प्रतिमामेकां स्थापयित्वा अस्त्राभ्यासमारेभे। अल्पेनैव कालेन स असत्रविद्यायामतीव प्रावीण्यं प्राप्तवान्।
क. कः द्रोणस्य समीपे अगच्छ्त ?
ख. एकलव्यः कस्य समीपम् अस्त्रविद्यां प्राप्तुं गतः आसीत् ?
ग. कः द्रोणं 'भगवन्' कथयित्वा सम्बोधयति ?
घ. गद्यांशस्य उचित शीर्षकं लिखत ?
ड़ एकलव्यः कस्य सुतः आसीत् ?

5. श्रीमद्भगवतद्गीता वस्तुतः महाभारतस्य अंशभूता अस्ति। अर्जुनः युद्धे निजबन्धून् दृष्ट्वा युद्ध–विमुखः अभवत्। तदा श्रीकृष्णः अर्जुनं सन्मार्गं दर्शयितुं तस्मै उपदेशम्। श्रीकृष्णस्य तस्य उपदेशस्य नाम एवं श्रीमद्भगवद्गीता अस्ति।
क. श्रीमद्भगवद्गीता महाभारतस्य किं रूपम् अस्ति ?
ख. 'श्रीमद्भगवद्गीता' कीदृशो ग्रन्थः अस्ति ?
ग. अर्जुनः निजबन्धूरन् दृष्ट्वा कीदृशः अभवत् ?
घ. श्रीकृष्णः अर्जुनम् सन्मार्गं दर्शयितुम् तस्मै किम् अयच्छत् ?
ड़ गंद्याशस्य उचितशीर्षकं लिखत।

6. परमदेशभक्तस्य महापुरूषस्य श्रीजवाहरलालनेहरोः नाम को न जानाति, यः यावज्जीवं पूर्वं स्वतन्त्रताप्राप्त्यै पश्चाच्च तस्य रक्षणे महान्तं प्रयत्नम् अकरोत्। सः भारतस्य योग्यः प्रधानमंत्री आसीत्। सः भारतम् उन्नतिपथं प्रापयितुं सदा प्रयत्नशीलः अभवत्। तदनन्तरं तस्य सुपुत्री श्रीमती इन्दिरा गान्धी भारतस्य प्रधानमन्त्रिपदं अलङ्कतवती।
क. कः भारतस्य योग्यः प्रधानमन्त्री आसीत् ?
ख. श्री नेहरोः पश्चात् का भारतस्य प्रधानमन्त्रिपदम् अलङ्कृतवती ?
ग. श्री नेहरोः पुत्र्याः किं नाम आसीत् ?
घ. श्री नेहरूः कीदृशः महापुरूषः आसीत् ?
ड़ गद्यांशस्य उचित शीर्षकं लिखत।

7. संस्कृतं भारतस्य गौरवमयी भाषा अस्ति। इयं मानवमात्रस्य कल्याणं करोति विश्वबन्धुत्वं च प्रसारयति। अस्याः साहित्यं विशालं वर्तते। संस्कृतमधीत्य जनाः गौरवमनुभवन्ति। संस्कृतदिवसः रक्षाबन्धनं दिवसे मानितो भवति। संस्कृतभाषायाः

अध्ययनेन सर्वैः भारतस्य संस्कृतिः रक्षणीया।
क. संस्कृतं भारतस्य कीदृशी भाषा अस्ति ?
ख. कैः भारतीयसंस्कृतिः रक्षणीयाः ?
ग. कस्य साहित्यं विशालम् ?
घ. जना किम् अधीत्य गौरवमनुभवन्ति?
ड़ संस्कृतदिवसः कदा मानितो भवति ?

8. महात्मागान्धिः भारतस्य राष्ट्रपिता कथ्यते। अस्य जन्म काठियावाड़ प्रदेशे पोरबन्दरनामके स्थले अभवत्। अस्य विवाहः कस्तूरबानाम्न्या धार्मिक–महिलया सह बभूव। कुशाग्रबुद्धिरयं विधिशास्त्रस्योच्च शिक्षां प्राप्तुं विदेशं गतः।
क. महात्मागान्धि भारतस्य कः कथ्यते ?
ख. पोरबन्दर नगरं कस्मिन् प्रदेशे वर्तते ?
ग. महात्मागान्धिनः जन्म कुत्र अभवत् ?
घ. कस्य शिक्षां प्राप्तुं सः विदेशं गतः ?
ड़ अस्य विवाहः कया सह बभूव ?

9. हिमालये अनेकानि दर्शनीय–तीर्थस्थानानि अपि सन्ति। यत्र प्रतिवर्षं भक्ताः श्रद्धालवश्च गत ब्रदीनाथ – केदारनाथदिषु मन्दिरेषु भगवद्दर्शनं कुर्वन्ति। अद्यापि बहुत्र गुहासु मुनयः उषित्वा तपस्तपन्ति। अतः हिमालयस्य महत् गौरवं वर्तते। अस्य रक्षणे एवं भारतस्य रक्षास्ति। वयं प्रतिज्ञां कुर्मः यत् आवश्यकतायां सत्याम् अस्य रक्षार्थं प्राणानपि त्यक्ष्यामः।
क. हिमालये कति तीर्थस्थानानि सन्ति ?
ख. कः महान् गौरवपूर्णः पर्वतः वर्तते ?
ग. भक्ताः कुत्र भगवद्दर्शनं कुर्वन्ति ?
घ. हिमालयस्य गुहासु उषित्वा के तपस्तपन्ति ?
ड. गंद्याशस्य उचित शीर्षकं लिखत।

10. मनुष्यः जीवननिर्वाहाय यां कामपि आजीविकां गृहीतुं शक्नोति। पठनं, पाठनं, कृषिः, वाणिज्यं, सेवाकर्म, समाजसेवादिकं वा। परन्तु स सदा जीवनसाफल्याय सत्कर्म अवश्यं कुर्यात्। निरूद्देश्यं जीवनं विनश्यति। अतः कदाचिदपि उद्देश्यत्यागो न विधेयः। मनुष्यस्य सदुद्योगेन सदुद्देश्यमपि अवश्यं पूर्णं भवति।
क. मनुष्यः जीवनर्विाहाय काम् गृहीतं शक्नोति ?
ख. अनुच्छेदे आगतासु एकस्याः आजीविकायाः नाम लिखत ?
ग. मनुष्यः किमर्थं सत्कर्म अवश्यं कुर्यात् ?
घ. मनुष्यस्य सदुद्योगेन तस्य किं पूर्णं भवति ?
ड़ गद्यांशस्य उचितशीर्षकं लिखत।

11. सर्वे जनाः संसारे सुखमिच्छन्ति। सुखं च धनेन एवं प्राप्तुं शक्यते। अतः धनोपार्जनस्य आवश्यकता भवति। यस्य समीपे धनं भवति, सः सुखेन शेते। निर्धनं पुरूषं तु मित्राणि अपि त्यजन्ति। चौर्येण, कपटेन उत्कोचग्रहणेन च प्राप्तं धनं विनाशकरं भवति। कृषिकर्मणा, व्यापारेण, सेवया, परिश्रमेण च प्राप्तं धनं फलति।
क. संसारे सर्वे जनाः किम् इच्छन्ति ?
ख. धनेन किं प्राप्तुं शक्यते ?

ग. धनिकः कथं सुखेन शेते ?
घ. निर्धनं पुरूषं कानि त्यजन्ति ?
ड़ गद्यांशस्य उचितशीर्षकं लिखत ।

12. भारतस्य संविधाने प्रधानमन्त्रिणः पदम् अतीव महत्वपूर्ण वर्तते। सः राष्ट्रस्य असिद्धानि कार्याणि साधयितुं प्रभवति। सः प्रमुखदलस्य नेता भवति। सः मन्त्रिमण्डलस्य अध्यक्षः वर्तते। सः राष्ट्रम् उन्नतिपथं नेतुम् अहोरात्रं प्रयतेत इति काम्यते।
क. भारतसंविधाने कस्य पदम् महत्वपूर्णम् अस्ति ?
ख. भारतसंविधाने प्रधानमन्त्रिणः पदम् कीदृशं वर्तते ?
ग. प्रधानमन्त्री कीदृशानि कार्याणि साधयितुम् प्रभवति ?
घ. कस्य अध्यक्षः प्रधानमन्त्री वर्तते ?
ड. गद्यांशस्य शीर्षकं लिखत।

13. एकदा कौरवपाण्डवानां शस्त्रकौशल परीक्षा अभवत्। वृक्षशाखायां लक्ष्यरूपेण एकः कृत्रिमखगः स्थापितः आसीत्। आचार्यद्रोणेन पूर्वं युधिष्ठिरः आहूतः पृष्ठश्च। लक्ष्यवेधवेलायां त्वं किं किं पश्यसि ? युधिष्ठिरोऽब्रवीत् – अहं खगं, वृक्षं, सर्वान् सहचरान्, भवन्तमपि च पश्चामि। उत्तरं श्रुत्वा आचार्य द्रोणः अहसत्।
क. कदा पाण्डवानां शस्त्रकौशलपरीक्षा अभवत् ?
ख. वृक्षशाखायां कति कृत्रिमखगः स्थापितः आसीत् ?
ग. केन पूर्वं युधिष्ठिरः आहूतः ?
घ. कस्य उत्तरं श्रुत्वा द्रोणः अहसत् ?
ड़ गद्यांशस्य शीर्षकं लिखत।

14. विद्यार्थिजीवनस्य कृते गुरूभक्तिः तथैव अनिवार्यम् अंगम् यथा ईश्वर–भक्तिः अनिवार्या। गुरूभक्तिं विना न कोऽपि विद्यार्थी विद्यावान् भवितुमर्हति। अधुना नैतिकशिक्षायाः अभावेन नितान्तं चंचलता, उच्छृंखलता अनुशासनहीनता च वृद्धिमाप्नोति। छात्राः स्वाध्यापकान् नैव सत्कुर्वन्ति। ते क्रीडासु कुसंगेषु चित्रपटदर्शनादिषु अमूल्यं समयं नाशयन्ति। ते सर्वत्र तिरस्कारं लभन्ते।
क. कां विना विद्यार्थी विद्यावान् भवितुं न अर्हति ?
ख. कस्याः अभावेन अनुशासनहीनता वृद्धिमाप्नोति ?
ग. छात्राः कान् नैव सत्कुर्वन्ति ?
घ. छात्राः कुत्र समयं नाशयन्ति ?
ड. 'विना' शब्दस्य योगे का विभक्तिः प्रयुक्ता ?

15. दीपोत्सवः भारतीयानां प्रसिद्धं पर्वः अस्ति। अस्य प्रारम्भः रामायण–कालात् अभवत्। यदा श्रीरामचन्द्रः रावणं निहत्य अयोध्यायाम् आगच्छत् तदा जनैः स्वगृहेषु मंगलसूचकाः दीपकाः प्रज्वालिताः। अस्मिन् उत्सवे जनाः लक्ष्मीपूजां कुर्वन्ति। अयमुत्सवः कार्तिकमासस्य अमावस्यायां सम्पाद्यते। पर्व इदम् प्रकाशस्य पर्वः भवति।
क. दीपोत्सवः केषाम् प्रसिद्धं पर्व अस्ति ?
ख. दीपोत्सवः कस्मिन् मासे सम्पाद्यते ?
ग. किम् पर्व प्रकाशस्य पर्वास्ति ?
घ. दीपोत्सवे जनाः कस्याः पूजां कुर्वन्ति ?

ड. 'प्रज्वालिताः' क्रियापदस्य कर्तुपदम् किम् ?

16. कस्मिंश्चिद् तपोवने धौम्यनामा ऋषिः अवसत्। तस्य आश्रमे विद्यार्थिनः विद्याध्ययनार्थम् आगच्छन्ति स्म। तेषु शिष्येषु आरूणिः अपि एकतमः आसीत्। सः सौम्यः, विनम्रः सरलहृदयश्च आसीत्। एकदा ऋषिः तं वर्षतौ आश्रमस्य क्षेत्रेषु जलं रोद्धुम् प्रेषयत्। आरूणिः गुरो आज्ञां स्वीकृत्य तथा कर्त्तुं क्षेत्रम् अगच्छत्। गुरोः आज्ञा कथं सफला भवेत् इति विचार्य स निजशरीरमेव बन्धस्थाने अस्थापयत्।

क. ऋषेः किं नाम आसीत् ?

ख. कः सौम्यः विनम्रः च आसीत् ?

ग. आश्रमे के विद्याध्ययनार्थम् आगच्छन्ति स्म?

घ. आरूणिः निजशरीरं कुत्र अस्थापयत् ?

ड. गद्यांशस्य शीर्षकं लिखत ।

17. बाल्यकाले विशेषतो बालकस्योपरि संसर्गस्य प्रभावो भवति। बालकः यादृशैः बालकैः सह संगतिं करिष्यति तादृशः एव भविष्यति। अतो बाल्यकाले दुर्जनैः सह संगतिः कदापि न करणीया। दुर्जनानां संसर्गेण बह्वयः हानयः भवन्ति, यथा दुर्जनसंसर्गेण मनुष्यः असद्वृत्तः, दुर्विचारः भवति, तस्य बुद्धि, दूषिता भवति। सः दुर्व्यसनग्रस्तो भवति, अतः तस्य शरीरं क्षीणं दुर्बलं च भवति। कीर्तिः नश्यति। अतः स्वयशवृद्धये, ज्ञानवृद्धये, सुखस्य शान्तेश्च प्राप्त्यै सर्वैरपि सदा सत्संगतिः करणीया, दुर्जनसंगतिश्च हेया।

क. केन कारणेन बुद्धिः दूषिता भवति ?

ख. बालकस्योपरि कस्य प्रभावः विशेषतः बाल्यकाले भवति ?

ग. किं प्राप्तुं सत्संगतिः करणीया ?

घ. दुर्जनानां संसर्गेण कति हानयः भवन्ति ?

ड. उपरिलिखितस्य गद्यांशस्य शीर्षकः दीयताम्।

18. मानवजीवने छात्रजीवनं प्रशस्ततमम् अस्ति। अस्मिन् एव जीवने नरः भाविजीवनस्य निर्माणं करोति। इदं जीवनं चिन्ताशून्यं आनन्दप्रदं च वदन्ति वृद्धाः। सिद्धान्तरूपेण आजन्मनः पञ्चविंशतिवर्षाणि यावत् छात्रजीवनं प्रसरति इति स्वीक्रियते बुधैः। अध्ययनकाले विद्यार्थी सततं महापुरूषैः सह संवदति। महाकवीनां काव्यरसं पीत्वा स्वात्मानं पवित्रीकरोति। ये छात्रजीवने सदाचारस्य जीवनम् आप्नुवन्ति ते एवं भाविजीवने सफलाः भवन्ति। अतः सर्वथा अभिनन्दनीयम् इदं जीवनम्।

क. मानवजीवने छात्रजीवनं कीदृशम् अस्ति ?

ख. नरः कदा भाविजीवनस्य निर्माणं करोति ?

ग. कीदृशं सर्वथा छात्र–जीवनम् ?

घ. किं सिद्धान्तरूपेण पञचविंशतिवर्ष–पर्यन्तं स्वीक्रियन्ते ?

ड़ उपरिलिखितस्य अनुच्छेदस्य शीर्षकं दीयताम्।

19. भोजः एकाकी दूतेन सह तत् स्थानं गत्वा परमानन्दं प्राप्य अवादीत् – ''अहो! अतिपवित्रम् एतत् स्थानम्, अत्र साक्षात् जगदम्बिका निवसति। एतत् स्थानं दृष्ट्वा मनो मे विमलं जातम्।'' इत्युक्त्वा तत्र उदक्स्नानं विधाय देवतां नमस्कृत्य, यत्र ब्राह्मणो हवनं करोति, तत्र गत्वा ब्राह्ममणवोचत् – ''भो ब्राह्मण ! हवनम् आरभ्य कतिवर्षाणि जातानि ?'' ब्राह्मणेनोक्तम् – यदा सप्तर्षिमण्डलं रेवतीनक्षत्रस्य प्रथमचरणे स्थितं, तदा मया हवनं

प्रारब्धम्, इदानीम् अश्विनीनक्षत्रे तिष्ठति। होमं कुर्वतो मे वर्षशतमभूत, तथापि देवी प्रसन्ना नाभवत्।''

क. भोजः दूतेन सह कीदृशं स्थानं अगच्छत् ?

ख. नृपः भोजः केन सह गतः ?

घ. भो ब्राह्मण! हवनम् आरभ्य कति वर्षाणि जातानि' अस्य वाक्यस्य वक्ता कः ?

ग. ब्राह्मणेन का प्रसन्ना नाभवत् ?

ड़ उपरिलिखितस्य गद्यांशस्य शीर्षकं लिखत।

20. को न जानाति महात्मनो गान्धिनो नाम। एष खलु महापुरूषो न केवलं भारतस्य हितमाचचार, अपितु विश्वस्यापि जगतः। यद्यपि नास्ति साम्प्रतं महात्मा गान्धी अस्मिन्नवसरे जगति भौतिकेन देहेन, किन्तु यशः शरीरेण अद्यापि विद्यते, स्थास्यति च चिरम्। सत्यम्, अहिंसा, लोकसेवा च रत्नत्रयमस्य जीवनस्य प्रधानमुद्देश्यमासीत् एतत्त्रयस्य उपासनयैव एष विश्ववन्दनीयो जातः।

क. महात्मा गान्धी अद्यापि कीदृशेण शरीरेण जीवति?

ख. गान्धी कीदृशेण देहेन अद्यापि संसारे विद्यते ?

ग. किम् महात्मा गान्धिनः जीवनस्य प्रधानम् उद्देश्यम् आसीत् ?

घ. माहत्मा गान्धी कीदृशो जातः ?

ड. उपरिलिखितस्य गद्यांशस्य शीर्षकं लिखत।

21. आतंकवादः आधुनिक विश्वस्य गुरूतमा समस्या अस्ति। संसारस्य प्रत्येकं देशः आतंकवादेन येन केन प्रकारेण पीडितः अस्ति। आतंकवादः विनाशस्य सा लीला या विश्वम् ग्रसितुम् तत्परा अस्ति। भारतं तु आतंकवादेन अनेकैः वर्षः पीडितः वर्तते। आतंकवादे तु ते एव जनाः सम्मिलिताः सन्ति ये स्वार्थपूर्तिम् कर्तुम् इच्छन्ति, संसारे च अशान्तेः वातावरणं द्रष्टुम् कामयन्ते। शान्तीच्छुकैः देशैः आतंकवादस्य राक्षसस्य विनाशाय मिलित्वा एव प्रयत्नाः समाधेयाः अन्यथा एषा समस्या सुरसामुखम् इव प्रतिदिनं वृद्धिं यास्यति।

क. आतंकवादः कस्य लीला ?

ख. कीदृशैः देशैः मिलित्वा आतंकवादस्य विनाशाय प्रयत्नाः समाधेयाः ?

ग. कः आतंकवादेन अनेकैः वर्षैः पीडितः ?

घ. एषा समस्या किम् इव वृद्धिम् यास्यति ?

ड़ अनुच्छेदस्य कृते उचितं शीर्षकं यच्छत्।

22. एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः। सहसा क्रन्दनध्वनिं श्रुत्वा सः इतस्ततः अपश्यत्। बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत्। एतत् दृष्ट्वा सिद्धार्थस्य चित्तं करूणया व्याकुलं जातम्। सः धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के अधारयत्। अत्रान्तरे देवदत्तः धावन् तत्र प्राप्तः। सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः अवदत् – ''सिद्धार्थ ! एषः मम हंसः। मया बाणेन निपातितः। अतः मह्यं देहि।'' सिद्धार्थ दृढतया अवदत् – ''अहं न दास्यामि, अहम् रक्षकः अस्मि।''

क. कः भूमौ पतितः आसीत् ?

ख. हंसः कस्य समीपं गतवान् ?

ग. सिद्धार्थः विहारार्थं कुत्र गतः ?

घ. सिद्धार्थस्य चित्तं कदा व्याकुलं जातम् ?

ड़ अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत।

23. हिमालयो नाम पर्वतः भारतदेशस्य उत्तरस्यां दिशि वर्तते। अस्य शिखरभागाः सदैव हिमाच्छादिताः सन्ति। अतएव सः हिमस्यआलयः 'हिमालयः' कथ्यते। सः विश्वस्य समस्तेषु पर्वतेषु उन्नततमः। अतएव सः 'नगाधिराजः' इत्यपि ज्ञायते। पर्वतोऽयं भगवान् शिवस्य क्रीडास्थली, भगवत्याः पार्वत्याः उत्पत्तिस्थलमपि, विविध–किन्नरं–गन्धर्व–साधु–सुरादीनां वसतिरपि।

क. उपर्युक्त गद्यांशस्य उचित शीर्षकं लिखत।

ख. हिमालयः भारतस्य कस्यां दिशि वर्तते ?

ग. हिमालयः कस्य क्रीडास्थली अस्ति ?

घ. कः विश्वस्य समस्तेषु पर्वतेषु उन्नततमः ?

24. संसारे अनेकेषां दुःखानां मूलकारणम् अज्ञानम् एवं अज्ञानात् एवं समाजे नानाविकाराणां जन्म भवति। हिंसाभ्रष्टाचारादयः ये उपद्रवाः अस्मान् पीडयन्ति, तेषां मूले अशिक्षा एवं वर्तते। वयं शिक्षायाः प्रकाशेन अज्ञानस्य अन्धकारं हर्त्तुं सज्जाः भवेम।

क. उपरिलिखितस्य गद्यांशस्य शीर्षकं दीयताम्।

ख. दुःखानां मूलकारणं किम् ?

ग. समाजे अनेके विकारा कथं जायन्ते ?

घ. के उपद्रवाः अस्मान् पीडयन्ति ?

ड़ अज्ञानस्य अन्धकार हर्तुं वयं किं कुर्याम् ?

25. अन्नजलादिकस्येव व्यायामस्यापि महती आवश्यकता वर्तते शरीरसंवर्धनाय। व्यायामेन शरीरस्थावयवाः पुष्टाः संजायन्ते, रक्तस्य सम्यक् सञ्चारो भवति, स्फूर्तिः प्राप्यते, रोगाः पलायन्ते, जीवनञ्चाह्लादयमं भवति। स्वस्थे शरीरे एवं स्वस्थं मस्तिष्कं सम्भवति इति धारणा सर्वमान्या अस्ति।

क. उपर्युक्तगद्यांशस्य उचितशीर्षक लिखत ।

ख. स्वस्थमष्तिष्कं कुत्र सम्भवितः ?

ग. स्फूर्तिः केन प्राप्यते?

घ. व्यायामस्य आवश्यकता किमर्थं भवति ?

प्र. 17 गद्यांशानाम् सम्यक पठित्वा अधोलिखित प्रश्नानाम् उत्तराणि संस्कृत भाषायां देयानि

निम्नलिखित गंद्याशों को पढ़कर प्रश्नों के उत्तर संस्कृत भाषा में लिखिए।

1. स होवाच याज्ञवल्क्यः–प्रिया बतारे नः सती प्रियं भाषसे एह्यास्व व्याख्यास्यामि ते, व्याचक्षाणस्य तु मे निदिध्यांसर। स होवाच–न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्म कामाय पतिः प्रियो भवति। न वा अरे जायायै कामाय जाय प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति।

1. पत्युः कामाय कः प्रियो भवति ?
2. जायायै कामाय का प्रिया भवति ?
3. ''एह्यास्व व्याख्यास्यामि ते'' एतत् कथनं कस्य अस्ति ?
4. ''पत्युः'' इत्यस्मिन् पदे का विभक्तिः अस्ति ?
5. आत्मनस्तु कामाय का प्रिया भवति ?

2. न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति। न वा अरे

वित्तस्य कामाय वित्तं प्रिया भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति। न वा अरे सर्व कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति।आत्मा व अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः मैत्रेयात्मनोवा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदंविदितम्।

1. पुत्राणां कामाय कः प्रियः भवति ?
2. वित्तस्य कामाय किं प्रियं भवति ?
3. आत्मा केन ज्ञायते ?
4. काम् दृष्टव्यः ?
5. ''श्रोतव्यः'' इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?

3. ततः स वित्रविक्रमसेनो राजा शिंशपातरूं प्राप्तः तं शवमवतार्य, स्कन्धे गृहीत्वा भिक्षोः प्रति तूष्णीं प्रस्थितः मार्गे कश्चिद्वेतालस्तं शवं प्रविश्य राजानं सस्नेहमब्रवीत्। राजन्! भाराक्रान्तोऽसि कष्टेन च मार्गमाक्रमसे। अतस्ते मनोविनोदाय कथां वर्णयामि कर्णं दत्वा श्रृणु।

1. शिशपातरूं केन प्राप्तः ?
2. राज्ञा शवं गृहीत्वा कुत्र गतः ?
3. शवे कः प्रविष्टः ?
4. वेतालः किमर्थम् कथां श्रावयति ?
5. ''प्रस्थितः'' इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?

4. उज्जयिन्यो हरिस्वामीति सद्गुणो विप्रवरः पुण्यसेनस्य भूपतेः प्रधानामात्यो बभूव। तस्यानुरूपायां देवस्वामीति सच्छीलः पुत्रो जातः, तद्वच्च सोमप्रभा नाम लावण्यवती कन्यापि तस्य संभूता क्रमेण तु समुल्लसितयौवना सा विवाहयोग्यऽभवत्। तदा सा मातृमुखेन पितरं भ्रातरं च न्यवेदयत्। अहं तस्यैव कण्ठे मालामर्पयिष्यामि यः शूरो वा ज्ञानी वा विज्ञानी वा भवति।

1. हरिस्वामी कुत्र निवसति स्म ?
2. विप्रस्य नाम किम् आसीत् ?
3. हरिस्वामीनः पुत्रस्य नाम किम् ?
4. सोमप्रभा कथं आसीत् ?
5. सोमप्रभा पितरं भ्रातरं च कथं न्यवेदयत् ?

5. तच्छ्रुत्वा तत्पिता हरिस्वामी तादृशं वरमितस्ततोऽन्विष्यन् चिन्तां वहति। तावदेकः कुमारस्तमभ्येत्य तां सुतां ययाचे। हरिस्वामी तं पप्रच्छ। ज्ञानिनं, विज्ञानिनं, शूरं वा विहाय मत्पुत्री नान्यं वरमिच्छति। तत्रैषां मध्यात्कथय को भवानिति ? कुमारस्तं प्रत्यभाषत। जानाम्यहं विज्ञानमिति। तर्हि तद्दर्शयस्वेति तेनादिष्टः सः कुमारः स्वशक्त्या गगनचरं रथं कल्पयामास। तस्मिन् रथे तं हरिस्वामिनमारोप्य, क्षणादूर्ध्व नीत्वा च, तस्मै स्वर्गादील्लोकानदर्शयत्।

1. हरिस्वामी किमर्थं चिन्तां वहति ?
2. कुमारः किम् अयाचत् ?
3. प्रथमः कुमारः कां विद्यां जानाति स्म ?
4. कुमारः स्वशक्त्या किं कल्पयामास ?
5. कुमारः स्वर्गादिलोकान् कं दर्शयति ?

6. अत्रान्तरं कश्चिदन्य कुमारस्तत्पुत्रं देवस्वामिनं तु समुपेत्य तद्भगिनीमयाचत्। ज्ञानिविज्ञानिशूरेभ्यो नान्यं पति मे भगिनी वरयिष्यतीति, तेन विज्ञापितः स साभिमानं शूराऽहमित्यवदत्। ततो दर्शिशस्त्राकौशलाय तस्मै शूराय देवस्वामी मातुः परोक्षं स्वानुजां दातुं वचनबद्धोऽभूत्। सप्तमे दिने पाणिग्रहण संस्कारो भविष्यतीति प्रतिज्ञावान् सः।

1. द्वितीयः कुमारः कस्य समीपं आगतः ?
2. कुमारः कः आसीत् ?
3. देवस्वामी मातुः परोक्षं कां दातुं वचनबद्धोऽभवत्।
4. सप्तमे दिने किं भविष्यति ?
5. ''अयाचत्'' इत्यस्य पदस्य विभक्तिं वचनञ्च लिखत।

7. तत्कालमेव कोऽपितृतीयः कुमारो हरिस्वामिभार्यामभ्येत्य तत्सुतां याचिवान्। सा प्राह–अस्मत्कन्या तमेव वरमभिलषति यो ज्ञानी विज्ञानी शूरो वा भवतीत्। एवमुक्तश्च स सविनयमुवाच–हे अम्ब!ज्ञानवानहमस्मीति। ततः तस्मै भूतं भवत् भविष्यच्च पृच्छति त्रिकालदर्शित्वे यस्य निरस्तसन्देहा साऽभवत्। सप्तमें दिने परिणय विधिमनुष्ठातुं तस्य करे दुहितृदानजलमपातयत्।

1. तृतीयः कुमारः कस्याः समीपं आगतवान् ?
2. कुमारः सविनयं किं उवाच ?
3. सा दुहितृदानजलम् कस्य हस्ते अपातयत्।
4. सोमप्रभा कीदृशं पतिमिच्छति स्म ?
5. ''याचितवान्'' इत्यास्मिन् पदे कः प्रत्ययः ?

8. सा सोमप्रभा कन्या सहसा विनष्टा। इतस्ततो निपुणमन्विष्यमाणऽपि नालभ्यत। ततो हरिस्वामी ससंभ्रमं ज्ञानिनमुवाच–ब्रूहि सत्वरं दुहिता मे कुत्र गतेति ? सोऽपि स्वनेत्रे निमील्य समाधिना सर्ववृत्तान्तं परिज्ञाय हरिस्वामिनमवदत् – ' धूमशिखेन राक्षसेन सा कन्या सगूढमपहृत्य विन्ध्याटवीमध्यमे निजां वसतिं नीतेति।

1. विवाहादिने का विनष्टा ?
2. हरिस्वामी ससंभ्रमं ज्ञानिनं किम् उवाच ?
3. सा कन्या केन अपहृता ?
4. राक्षसेन सा कन्या कुत्र नीता ?
5. ''गतेति'' एतस्य पदस्य सन्धिविग्रहं कृत्वा सन्धिनाम लिखत।

9. विज्ञानी तमाश्वासयामास । यत्र तव कन्या विद्यते तत्रैव युष्मान्सर्वान् क्षणान्नेष्यामीति। अनन्तरं सर्वास्वसंयुक्तमाकाशगमिनं रथं कृत्वा, तस्मिनन्सर्वान्समारोप्य, विन्ध्याटव्यां यत्र राक्षसस्य वसतिस्तत्र तानानीतवान्। तत्र सक्रोधं स्वदुगार्न्निर्गतेन घोरदर्शनेन राक्षसेन सह सशूरो निर्भयमयुध्यत्। स्वखड्गेन सः शूरः तच्छिरश्चिच्छेद। हते राक्षसे तां सोमप्रभां गृहीत्वां ते सर्वे गगनमार्गेण स्वगृहमाजग्मुः।

1. आकाशगामिनं रथं केन कृतम् ?
2. रथे सर्वान्समारोप्य कुत्र अनीतवान् ?
3. राक्षसेन सह कः युद्धम् अकरोत् ?
4. स्वखड्गेन सः शरः किं कृतवान् ?

5. ते सर्वे केन मार्गेण स्वगृहमाजग्मुः ?

10. एवम् आचार्यः रोगस्य मूलकारणं मानसं मन्यते। मनसि दुष्टे सति भौतिकदोषाः जायन्ते। अवश्यमेव भेषजानामपि आवश्यकता उपादेयता च वर्तते एव, किन्तु विचारदोषे पुनर्जाते रोगाणां पुनर्जन्म भविष्यत्येव। अतः बुद्धिशुद्धिः प्रथमा परमा च आवश्यकी भवति तदैव रोगाणां मूलोच्छेदो भविष्यति। पाठोऽयं चरकसंहिताश्रयात् आयुर्वेदीयहितोपदेशग्रन्थात् उद्धृतोऽस्ति।

1. आचार्य रोगस्य मूलकारणं कं मन्यते ?
2. भौतिकदोषाः कथं जायन्ते ?
3. विचारदोषे पुनर्जाते किं भविष्यति ?
4. परमा प्रथमा च आवश्यकी का भवति ?
5. ''जनपदध्वंसकारणम्'' पाठः कुत्रतः गृहीतः ?

11. तमुवाच भगवान् आत्रेयः – सर्वेषाम् अपि, अग्निवेश ! वाटवादीनां यद्वैगुण्यम् उत्पद्यते तस्य मूलम् अधर्मः तन्मूलं च असत्कर्म पूर्वकृतम्। तयोर्योनिः प्रज्ञापराध एव। तद् यथा, यदा वै देश–नगर–निगम–प्रधानाः धर्मम् उत्क्रम्य अधर्मेण प्रजां वर्तयन्ति, तदाश्रितोपाश्रिताः पौरजानपदा व्यवहारोपजीविनश्च तम् अधर्मम् अभिवर्धयन्ति, ततः सोऽधर्मः प्रसमं धर्मम् अन्तर्धत्ते।

1. अर्धमः कस्य मूलम् ?
2. वैगुणस्य मूलं किम् ?
3. अर्धमस्य मूलं किम् ?
4. अधर्मः प्रसभं कम् अन्तर्धन्ते ?
5. उपरिलिखितगद्यांशात् अव्ययद्वयं चित्वा लिखत ।

12. परिग्रहाल्लोभः प्रादुरासीत् कृते। ततस्त्रेतायां, लोभाद्र अभिद्राहः, अभिद्रोहाद्, अनृतवचनम् अनृतवचनात् काम–क्रोध–मान–द्वेष–पारूष्याभिघात–भय–ताप–शोक–चिन्तोद्वेगादयः प्रवृत्ताः। ततस्त्रेतायां धर्मपादोऽन्तर्धानमगमत्। तस्यान्तर्धानाद् युगवर्षप्रमाणस्य पादह्रासः। पृथिव्यादेश्च गुणपादप्रणाशोऽभूत्।

1. लोभात् अभिद्रोहः कस्मिन् युगे अभवत् ?
2. कस्मात् चिन्तोद्वेगादयः प्रवृत्ताः ?
3. कस्माद् लोभः प्रादुरासीत् ?
4. कस्य अन्तर्धानाद् युगवर्षप्रमाणस्य पादह्रासः ?
5. ''ततस्त्रेतायां'' इत्यस्य पदस्य सन्धिविच्छेदं कुरूत।

13. अतीते वाराणास्यां ब्रह्मदत्ते राज्यं कुर्वति बोधिसत्वः तस्याग्रमहिष्याः कुक्षौ प्रतिसन्धिं गृहीत्वा लब्धगर्भपरिहारः स्वस्तिना मातृकुक्षेः निष्कासीत्। नामग्रहणदिवसे पुनरस्य ब्रह्मदत्तकुमारस्व्येव नामाकार्षुः। स आनुपूर्व्येण वयः प्राप्तः षोडशवर्षकाले तक्षशिलां गत्वा सर्वशिल्पेषु निष्पतिं प्राप्य पितरव्ययेन राज्ये प्रतिष्ठाय धर्मेण समेन राज्यमकार्षीत्।

1. ब्रह्मदत्तः कस्याः नगर्याः राजा आसीत् ?
2. ब्रह्मदत्तः कुत्र अध्ययनं कृतवान् ?
3. ब्रह्मदत्तः तक्षशिलां कदा गतवान् ?
4. धर्मेण समेन राज्यं केन कृतम् ?
5. ''गत्वा'' इत्यस्य पदस्य प्रकृतिप्रत्ययञ्च पृथक्कुरूत।

14. ऋग्यजुस्सामवेदास्त्रयत्रयी अथर्ववेदेतिहासवेदौ च वेदाः शिक्षा कल्पो व्याकरणं निरूक्तं छन्दोचितिऽज्यौतिषमिति चाङ्गानि एषः त्रयीधर्मश्चतुर्णां वर्णानामाश्रमाणां च स्वधर्मस्थापनादौपकारिकः। स्वधर्मो ब्राह्मणस्याध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति।

1. त्रयी का ?
2. कानि वेदाङ्गानि ?
3. त्रयीधर्मः कस्माद् औपकारिकः ?
4. अध्यापनं कस्य एवधर्मः ?
5. प्रतिग्रहः दानं च कस्य धर्मः ?

15. क्षत्रियस्याध्ययन यजनं दानं शास्त्रजीवो भूतरक्षणं चं वैश्यस्याध्ययनं यजनं दानं कृषिपशुपाल्ये वणिज्या च। शूद्रस्य द्विजातिशुश्रूषा वार्ता कारूकुशीलकवकर्म च। गृहस्थ स्वकम्मजीवस्तुयैरसमानर्षिमिर्वैवाहयमृतुगामित्वं देवपित्रतिथिभृत्येषु त्यागः शेषभोजनं च।

1. भूतरक्षणं कस्य कर्त्तव्यम् ?
2. क्षत्रियस्य धर्माणां लिखत ।
3. कृषिपशुपालनं कस्य धर्मः ?
4. द्विजातिशुश्रूषा कस्य धर्मः ?
5. ''कर्त्तव्यम्'' इत्यस्य पदस्य प्रकृतिप्रत्ययञ्च पृथक्कुरूत।

16. ब्रह्मचारिणः स्वाध्यायोऽग्निकार्योभिषेकौ भैक्षव्रतत्वं अप्राणान्तिकी वृत्तिस्तदाभावें गुरूपुत्रे सब्रह्मचारिणि वा। वानप्रस्थस्य ब्रह्मचर्यभूमौ शय्या जटाऽजिनधारणमग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः।

1. ब्रह्मचारिणः कर्त्तव्यद्वयं वर्णयत् ?
2. स्वाध्यायः कस्यः प्रमुख कर्त्तव्यः ?
3. जटाऽजिनधारणं कस्य धर्मः ?
4. भूमौ शय्यां कस्य भवेत् ?
5. ''वृत्तिस्तदाभावे'' एतस्मिन् पदे का सन्धिः ?

17. परेधुः समरे समारब्धे युधिष्ठिरेण निहते मद्राधिपे शल्ये सहदेवशानल प्रविष्टे च शकुनौ, वृकोदरेणाभिद्रुतः दुर्योधनः समरागङ्णात् सत्वरं पलाय्य, कस्मिश्चित् विपिनसरसि निमग्नः सलिलस्तग्भनीं विद्यामास्थाय निभृतं तस्यौ।

1. केन मद्राधिपः निहतः ?
2. वृकौदरेण किं कृतः ?
3. समराङ्गणात् पलायनं कः अकरोत् ?
4. दुर्याधनः कुत्र निभृतं तस्थौ ?
5. सलिलस्तग्भनीं विद्यां कः जानति स्म ?

18. ततश्च तद्न्वेषणयम भगवता वासुदेवेन अधिष्ठतमेकरथामरूह्य समन्तात् पर्यटन्तौ भीमार्जुनौ अभिवीक्ष्य यद्दच्छासङ्गतः कश्चित् वनेचरः पुरूषगर्भमेतत् इति तत्सरः प्रदर्शयामास। तत्र दुर्योधनपदलाञ्छनां पदवीं दृष्टवा भीमसेनः भंयकरेण सिंहनादेन दिशामुखानि मुखरयन् सरस्सलिलमगाह्य समन्तात् आलोडयामास। तेन अतिक्रुद्धेन सरभसं सलिलात् उत्थितेन दुर्योधनेन समं भीमस्य भीमं गदायुद्धमारब्धमासीत्।

1. रथम् केन अधिष्ठितम् ?
2. कश्चित् वनेचरः किं कृतम् ?
3. कः सिंहनादं कृतवान्
4. भीमसेनः कम् आलोडयामास ?
5. भीमस्य गदायुद्धं केन सह अभवत् ?

19. अत्रान्तरे दुर्याधनस्य मित्रं चार्वाको नाम राक्षसः मुनिवेषधरी युधिष्ठिरं वञ्चयितुम्, ' भोः तृषितोस्मि पानीयमुपनीयताम्' इत्युच्चैः उद्घुष्यन् तदावासमाससाद। तेन यथावदुपचरितः चार्वाकः एवमब्रवीत्, प्रथमं भीमदुर्याधनयोः गदायुद्धे प्रवर्तमाने, वीसुलभां गतिमनीनयत्।

1. चार्वाकः कः आसीत् ?
2. मुनिवेषधारी किमर्थं आगतः ?
3. ''भोः! तृषितोऽस्मि'' एतत् कथनं कस्य आसीत ?
4. चार्वाकः वार्ताप्रसंगे का सूचनां ददाति?
5. उपरिलिखितगद्यांशात् अव्ययद्वयं चित्वा लिखत।

20. सद्य एव मूर्च्छितौ द्रौपदीयुधिष्ठरौ कथंचित् सज्ञां लब्धवा सुचिरम् अतिकरूणं विलप्य यावत् आदीपितां चितां प्रवेष्ठुम् उद्युक्तौ, तावत् भीमसेन, दुर्याधनं निहत्य, परिपूरितप्रतिज्ञाभरः क्षतजाभिषेकपाटलितशरीरः दुर्लक्षव्यक्तिः 'क्व सा तिष्ठति पाञ्चाली' इति उच्चैः उद्धुष्यन्, युधिष्ठिराभिमुखमाययौ।

1. सद्य एव कौ मूर्च्छितौ ?
2. आदीपितां चितां प्रवेष्टुं कौ उद्यतौ ?
3. भीमसेनः कं निहत्य प्रविशति ?
4. ''पाटिलत शरीरः'' कस्य आसीत् ?
5. केन प्रतिज्ञापूरितः ?

21. अथ परां कोटिमानन्दस्य अधिरूढे युधिष्ठिरे भीमसेनः दुर्याधनशोणितोक्षितेन पाणिना पतिव्रताललामभूतायाः पाञ्चाल्या दुश्शासनकराकृष्टं केशहस्तं संयमयामास। अथ एंव महान्तं विप्रवत्तं चार्वाकमन्विष्य निहत्य नकुलः सहदेवेन सममावासमाससाद।

1. परां कोटिमानन्दस्य अनुभवं कः करोति ?
2. पतिव्रताललामभूतायाः का आसीत् ?
3. पाञ्चाल्याः केशान् केन आकृष्टः ?
4. पाञ्चाल्याः केशान् कः संयममामास ?
5. ''निहत्य'' इत्यस्य पदस्य प्रकृतिप्रत्ययञ्च पृथक्कुरूत।

22. इंय हि लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तकताम्, उच्चैः श्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम्, इत्येतानि सहवासपरिचयवशात् विरहविनोदचिन्हानि गृहीत्वोद्गता।

1. क्षीरसागरात् का उद्गता ?
2. लक्ष्मीः इन्दुशकलात् कां विशेषतां गृहीत्वा निर्गता ?
3. लक्ष्मीः चञ्चलाम् केन गृहणाति ?
4. लक्ष्मी कालकूटात् कां शक्तिं गृहीतवती ?
5. ''इत्येतानि'' इत्यस्य पदस्य सन्धिविच्छेदं कृत्वा सन्धि नाम लिखत्।

23. लक्ष्मी न परिचयं रक्षति। रूपमालोकयते। न कुलक्रमनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरूध्यते। न त्यागमाद्रियते।

1. का परिचयं न रक्षति ?
2. लक्ष्म्या वैदग्ध्यं गण्यते न वा ?
3. कुलक्रमनुवर्तनं का न करोति ?
4. त्यागस्य आदरं का न करोति ?
5. ''श्रुतमाकर्णयति'' इत्यस्य पदस्य सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत।

24.वासन्ती – महाराज!ननु पृच्छामि कुशलं कुमारलक्ष्मणस्येति।
रामः – (आत्मगतम्) अये ! महाराजेति निष्प्रणयमामन्त्रपदम्। सौमित्रिमामके वाष्पस्रवलिपाक्षरः कुशलमप्रश्नः। तथा मन्ये विदितसीतावृत्तान्तेयमिति। (प्रकाशम्) आः! कुशलं कुमारलक्ष्मणस्य। वासन्ती – अयि देव ! किं परं दारूणः खल्वसि ?

1. बासन्ती ''महाराज!'' इति संबोधनस्य प्रयोगं कस्य कृते करोति ?
2. बासन्ती कस्य कुशलं पृच्छति ?
3. बासन्ती केन सह वार्तालापं करोति ?
4. रामः किम् उत्तरं ददाति ?
5. रोदनं का करोति ?

25. अस्ति पुण्यकृतामधिवासः, वासवावास इव वसुधामवतीर्णः शशिकरावदातवृत्तमुक्ताफलरिव गुणिभिः प्रसाधितः श्रीकण्ठो नाम जनपदः।। तत्र च एकदेश इव सुरराज्यस्य, प्रथमोऽवतार इव ब्रह्मलोकस्य, प्रतिनिधिरिव चन्द्रलोकस्य, नामाभिहार इव कुबेरनगरस्य, स्थाण्वीश्वराख्यो जनपदविशेषः।

1. जनपदस्य नाम किं ?
2. पुण्यकृतामधिवासः विशेषणः कस्य कृते प्रयुक्तः ?
3. वासवावास इव कः वसु धामवतीर्णः ?
4. कः जनपदर्विशेषः ब्रह्मलोकस्य प्रथमोऽवतारः इवास्ति ?
5. ''प्रतिनिधिरिव'' इत्यस्य पदस्य सन्धिविग्रहं कृत्वा सन्धि नाम लिखत।

26. यः, तपोवनमिति मुनिभिः चिन्तामणिरिति अर्थिभिः गुरूकुलमिति विद्यार्थिभिः, वसुधारेति, विप्रैः, अगृह्यत। तत्र च साक्षात्सहस्राक्ष इव सर्ववर्णधरं धनुर्दधानः, शशिमय इव कलासंग्रहे, विशालो मनसि, बुधः सदसि, अर्जुनो यशसि, भीष्मो धनुषि, राजा पुष्पभूतिरिति नाम्ना बभूव।

1. जनपदस्य नृपस्य नाम किम् ?
2. जनपदः मुनिभिः कथं अगृह्यत् ?
3. जनपदः विद्यार्थिभिः कथं अगृह्यत् ?
4. पुष्पभूतिः कलासंग्रहे कस्येव आसीत् ?
5. ''विशालोमनसि'' इति विशेषणं कस्य कृते प्रयुक्तः ?

27. ततस्तेन (लक्ष्मीधरेण) परिषच्चमत्कृता। राजा च तस्य प्रत्यक्षरं ददौ। पुनः कविराह – 'देव' मया सकुटुम्बेनात्र निवासाशया समागतम्। ततो राजा मुख्यामात्यं प्राह–'अस्मै गृहं दीयताम्' इति। ततो निखिलमपि नगरं विलोक्य कमपि मूर्खममात्यो नापश्यत् यं निरस्य विदुषे गृहं दीयते।

1. केन परिषच्चमत्कृता ?

2. अमात्यः निखिलं अपिनगरं विलोक्य कं नापश्यत् ?
3. राजा मुख्यामात्यं किं प्राह ?
4. पुनः कविता किं उक्तम् ?
5. ''विलोक्य'' इत्यस्य पदस्य प्रकृतिप्रत्ययञ्च पृथक्कुरूत।

28. एवं स्थिते नृपतिः कदाचिद्रात्रावेकाकी प्रच्छन्नवेषः स्वपुरे चरन् बाणगृहमेत्यातिष्ठत् तदा निशीथे वाणो दरिद्याकुलतया कान्तां वक्ति–'देवि, राजा कियद्वारं मम मनोरथमपूरयत्। अद्यापि पुनः प्रर्थितो ददात्येव। परन्तु निरन्तरप्रार्थनारसे मूर्खस्थापि जिह्वा जडीभवति।' इत्युक्त्वा मुहूर्तार्धं स्थितः।

1. प्रच्छन्न्वेशः राजा रात्रौ चरन् स्वपुरे कुत्रातिष्ठत् ?
2. मूर्खस्यापि जिह्वा कदा जडीभवति ?
3. कदाचिद्रात्रावेकाकी कः गतवान्।
4. ''द्रदात्येव'' इत्यस्य पदस्य सन्धिविच्छेदं कृत्वा सन्धि नाम लिखत।
5. ''उक्त्वा'' इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?

29. एकदा रजन्यां सिहादुर्गाविदूर एव सुकोमलशादायां कलितप्रासादायां भुवि कलिनसैनिकभटवेशः श्रीशिवबीरो गुप्तवेषेण परितः पर्यटन् दुग्धधारयेव क्षालितैर्ज्योत्सनया प्रकाशितैः पथिमिरासन्नात् शिवमान्दिरात् आरात् आजगाम। यत्र च द्वारि रेणुरूषितरोमकुहरम् उत्थाय – उत्थाय पृष्ठभुत्कम्प्य ग्रीवां उद्धूय पौनः पुन्येन पतित्वा भुवि विलुष्ठतं कश्चन अश्वम् अद्राक्षीत्।

1. शिववीरः कदा पर्यटन् आसीत् ?
2. ज्योत्सना कीदृशी आसीत् ?
3. गुप्तवेषेण कः आसीत् ?
4. शिववीरः रेणुरूषितं के दृष्टवान् ?
5. ''कश्चन'' इत्यस्य पदस्य सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत।

प्र. 18 अधोलिखितानां पद्याशानाम् उत्तराणि संस्कृतभाषायां देयानि।

1. वाजस्य नु प्रसवे मातरं महीम्
अदितिं नाम वचसा करामहे ।
यस्यामिदं विश्वम्भुनमाविवेश,
तस्यां नो देवः सविता धर्म साविषत् ।।

1. वयं वचसा कां करामहे ?
2. इदं विश्वं कस्याम् आविवेश ?
3. मातरं महीं नाम केन कारणेन उच्यते ?
4. कः देवः नः धर्मं साविषत् ?
5. उपर्युक्त श्लोकस्यान्वयं लिखत।

2. अपि स्वर्णमयी लङ्का न मे लक्ष्मण! रोचते ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।

1. स्वर्णमयी लङ्का कम् न रोचते ?
2. स्वर्गादपि का गरीयसी ?
3. लङ्का कीदृशी आसीत् ?

4. श्लोके कः कं प्रति कथयति ?
5. श्लोकस्यान्वयं कुरूत।

3. गायन्ति देवाः किल गीतकानि, धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पहेतुभूते, भवन्ति भूयः पुरूषाः सुरत्वात्।।

1. गीतकानि के गायन्ति ?
2. पुरूषाः कस्मात् धन्या ?
3. के धन्याः भवन्ति?
4. ''स्वर्ग'' इत्यस्य पदस्य विलोमार्थिपदं लिखत।
5. श्लोकस्यान्वयं कुरूत।

4. उपनीय गुरूः शिष्यं शिक्षयेच्छौचमादितः।
आचारमग्निकार्यञ्च सन्ध्योपासनमेव च।।

1. गुरूः कस्य उपनयनं करोति ?
2. गुरूणा शिष्यं कदातः शौचम् शिक्षयेत् ?
3. गुरूः शिष्यं किं शिक्षयेत् ?
4. श्लोकस्यान्वयं कुरूत।

5. ब्रह्मारम्भेऽवसाने च पादौ ग्रहा। गुरोः सदा।
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः।।

1. गुरूोः वादौ कदां ग्राह्यौ ?
2. कथं अध्येयम् ?
3. ब्रह्मञ्जलिः किम् स्मृतः ?
4. ब्रह्मारम्भे कस्य अभिवादनं कुर्यात्।
5. श्लोकस्यान्वयं कुरूत।

6. इन्द्रियाणां विचरतां, विषयेष्वहारिषु।
संयमे यत्नमातिष्ठेद्, विद्वान् यन्तेव वाजिनाम्।।

1. कः संयमे यत्नमा तिष्ठेत् ?
2. कुत्र यत्नमातिष्ठेत् ?
3. विद्वान कस्य यन्ता इव भवति ?
4. श्लोकस्यान्वयं कुरूत।
5. ''विद्वान्'' इत्यस्यं पदस्य विलोमार्थिपदं लिखत।

7. अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्।।

1. वृद्धोपसेविनः किं प्राप्नोति ?
2. चत्वारि कस्य वर्धन्ते ?
3. अभिवादनशीलस्य यशः वर्धते न वा ?
4. ''चत्वारि'' एतस्य पदस्य लिङ्गं लिखत।
5. श्लोकस्यान्वयं कुरूत।

8. स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा।
अहिताननिलोद्धूतैस्तर्जयन्निब केतुभिः।।

1. सः प्रथमं कां दिशं ययौ ?
2. प्राचीं दिशं कः ययौ ?
3. केतुभिः केभ्यः उद्भूतैः ?
4. श्लोके रघोः साम्यं केन सह कृतम् ?
5. श्लोकस्यान्वयं कुरूत।

9. दिशि मन्दायते तेजो दक्षिणास्यां रवेरपि।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे।।

1. दक्षिणेदिशि कः मन्दायते ?
2. ''पाण्ड्याः'' इति शब्दस्य प्रयोगं कस्यकृते कृतम् ?
3. रघोः प्रतापं के विषेहिरे ?
4. श्लोके कस्य प्रतापस्य वर्णनम् कृतम् ?
5. श्लोकस्यान्वयं कुरूत।

10. त्वं जीवितं, त्वमसि मे हृदयं, द्वितीयं, त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरूध्य मुग्धां, तामेव शान्तमथवा किमतः परेण।।

1. श्लोके ''जीवितं'' इति शब्दस्य प्रयोगं कस्याः कृते कृतम् ?
2. रामस्य नयनयोः कृते सीता कथम् आसीत् ?
3. अङ्गे अमृतम् इव का आसीत् ?
4. ''मुग्धां'' इति विशेषणस्य प्रयोगं कस्याः कृते कृतम् ?
5. श्लोकस्यान्वयं कुरूत।

11. देव्याः शून्यस्य जगतो द्वादशः परिवत्सरः।
प्रणष्टमिव नामापि न च रामो न जीवति।।

1. प्रस्तुतश्लोके कः कं प्रति कथयति ?
2. जगतः कया शून्यः ?
3. कति परिवत्सरः जातः ?
4. कस्याः नामापि प्रणष्टमिव जातम् ?
5. श्लोकस्यान्वयं कुरूत।

12. इदं विश्वं पाल्यं, विधिवदभियुक्तेन मनसा, प्रियाशोको जीवं, कुसुममिव धर्मो ग्लपयति।
स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभस्तदद्याप्युच्छवासो भवति ननु लाभो हि रूदितम्।।

1. रामेण इद विश्वं केन मनसा पाल्यते ?
2. कस्याः शोकः रामस्य जीवं ग्लपयति ?
3. रामस्य कृते कः असुलभः ?
4. रामस्य कृते लाभदायकः किम् ?
5. श्लोकस्यान्वयं कुरूत।

13. इहं शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते।।
इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।

यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।

1. कासाम् प्रसादेन लोकयात्रा प्रवर्तते ?
2. कृत्सतं इति पदं कस्य पदस्य विशेषणमस्ति ?
3. यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते तर्हि किं भवति ?
4. ''वाचाम्'' इत्यस्य पदस्य विभक्ति वचनं च लिखत्।
5. श्लोकात् अव्यानि चित्वा लिखत।

14. इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्।
तथापि न तदाख्यातुं सरस्वत्यापि शक्यते।।

1. ईक्षुक्षीरगुडदीनां किम् अन्तरम् ?
2. सरस्वत्या किं आख्यातुं न शक्यते ?
3. ''शक्यते'' इत्यस्य पदस्य पुरूषवचनं च लिखत।
4. माधुर्यभेदम् कर्तुं का न समर्था ?
5. श्लोकस्यान्वयं कुरूत।

15. नैसार्गिकी च प्रतिभा श्रुचं च बहुनिर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः।।

1. कीदृशी प्रतिभा बहुनिर्मलम् अस्ति ?
2. कानि काव्यसम्पदः कारणानि ?
3. अमन्दः अभियोगश्च कस्याः कारणम् ?
4. ''श्रुतं'' इत्यस्य पदस्य विभक्तिवचनञ्च लिखत।
5. श्लोकस्यान्वयं कुरूत।

16. घटे भिन्ने यथाऽऽकाश आकाशः स्याद् यथापुरा।
एवं देहे मृते जीवो ब्रह्म सम्पद्यते पुनः।।
मनः सृजति वै देहान् गुणान् कर्माणि चात्मनः।
तन्मनः सृजते माया, ततो जीवस्य संसृतिः।।

1. देहे मृते जीवः किं सम्पद्यते ?
2. माया किं सृजते ?
3. मनः किं किं सृजति ?
4. घटे भिन्ने किं भवति ?
5. जीवः पुनः ब्रह्म कदा सम्पद्यते ?

17. नापेक्षा न त दाक्षिण्यं न प्रीतिर्न च सङ्गतिः।
तथापि हरते तापं लोकानामुन्नतो घनः।।

1. उन्नतः घनः किं करोति ?
2. घनं लोकात् किं कि न भवति ?
3. ''प्रीतिर्न'' इत्यस्य पदस्य सन्धिविच्छेदं कृत्वा सन्धि नाम लिखत।
4. श्लोकस्यान्वयं कुरूत।

18. पृष्टाः खलु परपुष्टाः परितो दृष्टाश्य विटपिनः सर्वे।
माकन्द न प्रपेदे मधुपेन तवोपमा जगति।।
भुक्ता मृणालपटली भवता निपीता,
न्यूम्बनि यत्र नलिनानि निषेवितानि।
रे राजहंस वद तस्य सरोवस्य,
कृत्येन केन भवितासि कृतोपकारः।।